E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.005

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# ।। शाकुन्तलोपज्ञं मानवं मूल्यम् ।।

**—डा. सिद्धिदात्री भारद्वाज**

प्राध्यापिका, संस्कृतविभागः, कलासंकायः, बी.एच.यू., वाराणसी-५

**शोधसारः**

महाकविकालिदासस्य रचनासु 'अभिज्ञानशाकुन्तलम्' प्रशस्यतेतराम्। कान्तासम्मिततयोपदेशयुजि नाटकेऽस्मिन् भारतीय-संस्कृतेः सामाजिक-राष्ट्रियान्ताराष्ट्रियमूल्यानां मूलभूतस्य मानवमूल्यस्य मनोज्ञं प्रतिबिम्बनं संजातम्। शाकुन्तलोपज्ञं शीलम्, अनसूया, प्रियवादिता, पशु-पक्षि-लता-पादपादिस्नेहः, आश्रमशिक्षा, विनयः, उत्सवप्रेम, आतिथ्यम्, पातिव्रत्यम्, वर्णाश्रमधर्मनिष्ठप्रकर्षः, तपस्त्यागसहिष्णुत्वम्, गूढतेजःसमुद्दीप्तिः, नैर्मल्यम्, औज्ज्वल्यम्, गाम्भीर्यम्, वीरसुतजन्म, राष्ट्रप्रेमप्रभृति मूल्यरत्नं व्यक्तिविश्रान्तं राष्ट्रव्यापि वा विलसति तस्य सामाजिकेषु प्रभावप्रसारः यथा राष्ट्रप्रेमप्रकर्षसंवर्धनो भवति तथा तथ्यप्रकाशनेऽस्मिन् निबन्धे पदतदर्थसंन्निवेशो विहितः।

**कूटशब्दाः**

मूल्यसहस्रा, संस्कृतिः, आस्पदम्, लोकचरितम्, भक्त्युत्कर्षः, सन्निवेशः, मानुषी, प्रतिकूलदैवशमनम्, धूमाकलितदृष्टिः, स्वातन्त्र्यम्, विप्रकृता, वैक्लव्यम्, प्रियमण्डना, गृहिणीपदम् भाग्यायत्तम्, वङ्कासारः, गूढं तेजः।

श्रीभारतं राष्ट्रं यां मूल्यसहस्रां संस्कृतिं प्राणपणेन अनादिकालाद् आत्मसात् कुरुते सा संस्कृतिरेव सनातनी राष्ट्रस्यास्माकं जन्मभूमेर्जनन्या आत्मा सर्वभावसुनिर्भरा जयति। अस्यां संस्कृतौ विहितास्पदानां राज्ञां शासकानां प्रजानां सन्ततीनां लतापादपानामिव पशूनां पक्षिणाम् आब्रह्मस्तम्बपर्यन्तानां नानाप्रविभागसंविभक्तानामपि अविभक्तानां तत्-तत् समाजानां चान्योन्यं भिद्यमानानामपि मूल्यानां यन्मूलं तदेव मानवं मूल्यमिति प्रवदन्ति मनीषिणो मान्याः।

'संस्कृतिः संस्कृताश्रिता'[१] सूक्तिमिमां चरितार्थयन्ती सम्पूर्णा संस्कृतिः सुसुखं यथा सन्धार्यमाणा विजृम्भेत तथा संस्कृतवाङ्मये प्रभुसम्मित-सुहृत्सम्मित-कान्तासम्मिततया समुपदिश्यमाना यथावसरं प्रतिबिम्बभावमापद्यमाना विद्योतते।

श्रुतिस्मृतिपुराणकाव्यात्मविधासु शतधा प्रवाहमयीषु काव्याभिधाना कलनामयी विद्याकला रोचतेतमां सुधीसहृदयेभ्यः। विविधप्रविभागसंविभक्ता काव्यकला कामं विभातु, नाटकप्रभेदप्रवाहमयी त्वेषा रमणीयतरा समाभाति सुविशालप्रक्षेत्रा 'काव्येषु नाटकं रम्यम्'[२] इत्येवं तोष्टूय्यमाना। यथोक्तम् —

**'न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**

**न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।'** इति[३]

**'देवानामिदमामनन्ति मुनय: शान्तं क्रतुं चाक्षुषं**

**रुद्रेणैतदुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**

**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते**

**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधकम्।।'** इति[४]

भावस्वभावानुकारे रससिद्धेषु कनिष्ठिकाधिष्ठितस्य महाकवे: कालिदासस्य तत्कृतिविशेषस्य च विश्रुतं समीक्षावच: कस्याविदितं सहृदयस्य? यथोक्तम्— 'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्।' इति[५]

**'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।'** इति च[६]

मातरं गायत्रीमपेक्ष्य वेदपुरुषस्य श्रद्धाविश्वासोपनता समर्च्यता, देवकीमपेक्ष्य श्रीकृष्णपरमात्मन: परमानन्द-स्वरूपता, कौसल्यामपेक्ष्य श्रीरामचन्द्रप्रभो: आनन्दवर्धनता, मातु: सुनीते: आज्ञापरामर्शमवाप्तवतो बालस्य ध्रुवस्य भगवदनुग्रहपात्रता, मातु: कयाधो: अवाप्तसत्सङ्गाया: गर्भे प्रह्लादस्य भगवति भक्त्युत्कर्ष-समन्वितता वा सुदृढं प्रशिक्षयति 'मातृदेवो भव'[७] 'माता ताभ्यो गरीयसी[८] 'माता गौरवेणातिरिच्यते'[९] इत्येवमात्मकं श्रुतिस्मृत्युपदेशबोधम्।

त्याग-धैर्य-तप:-तपस्विशुभाशी:-सम्प्राप्त्यादिना सुनियोजिता नियन्त्रिता च सदाचारपालनपरायणा स्नेह- प्रेमवात्सल्यमयी शील-सेवा-पोषणविधिमाकलयन्ती मानवमूल्यं सन्ततिवर्गे सन्निवेशयन्ती श्रीमातृशक्ति: महाकविना सकलेन प्रतिनिधिजनेन सम्पोषमानीता राष्ट्रगौरवं संवर्धयन्ती जयति शकुन्तला लावण्यमाधुर्यमयमूर्ति:।

यदद्य जेगीयते शकुन्तलाचरितं तत्र को हेतुरिति जिज्ञासायां विमृशामश्चेत् कविकर्मकौशलमेव सम्पश्यामो हेतुम्। महाकवि: प्रमाणभूताद् इतिहासग्रन्थात् कथानकं चित्वा तत्र शापादियोजनया सकारात्मकदृष्टिकोणानां संयोजनया च मूल्याधानप्रयोजकान् गुणान् सर्वत: समायातान् शकुन्तलाचरिते संगुम्फयति। ते गुणा भवन्ति समुल्लेखनीया एते —

१. विश्वामित्र-मेनकयो: पुत्री-ततो दिव्यता।

**मानुषीभ्य: कथं नु स्यादस्य रूपस्य सम्भव:।**

**न प्रभातरलं ज्योतिरुदेति वसुधातलात्।।** इति[१०]

२. नैष्ठिकब्रह्मचारिणा कुलपतिना आश्रमे पालिता संवर्धिता च।

**क्व वयं क्व परोक्षमन्मथो मृगशावै: सममेधितो जन:।**

**परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वच:।।** इति[११]

३. पुत्रीकृताया: प्रतिकूलदैवशमनार्थं कुलपति: पिता सोमतीर्थं प्रयाति।

४. तीर्थात् प्रतिनिवृत्त: अग्निहोत्री तात: अग्निशालायाम् आकाशभाषितेन शकुन्तलाया गान्धर्वविधिना परिणयं विदित्वा दु:खमिश्रं सुखमनुभवति। तद्यथा—

**'दिष्ट्या धूमाकलितदृष्टेरपि यजमानस्य पावके एवाहुति: पतिता।'** इति[१२]

५. उत्कृष्टा सखीसम्पद्। शकुन्तलाया: प्रियसखी अनसूया तस्या: असूयावर्जं हितं सुखं च पूर्णानन्दमयं कामयते चेदेकत:, अपरत: प्रियमेव ब्रूते सत्यसमन्वितं प्रियंवदा तस्या मनोरथप्राप्त्यै यतमाना सन्ततम्। यथोक्तम्—

**सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्।'** इति[१३]

६. शीलं यदुत्तमा सम्पद्

आश्रमात् प्रस्थिताया दुष्यन्तस्य राजधान्यां शार्ङ्गरव-वैखानसतापसेन सह भ्रात्रा समुपस्थिता विषमपरिस्थितावपि शीलं सर्वथा सुरक्षति। दुष्यन्तकर्तृकायां परिणयविस्मृतौ सत्यां 'नेयं मम भार्या सत्त्वगर्भा'— इत्युक्त्वा राज्ञा तस्या: अस्वीकारे तापस: साक्रोशं राजानं ब्रूते —'त्यज वैनां गृहाण वा इति।[१४] अथ शकुन्तलां तत्रैव परित्यज्य कण्वाश्रमं प्रत्याजग्मौ। अथ तदनुगमनाय शकुन्तलायां सम्प्रवृत्तायां महर्षिकण्वस्य सहमतिं विनैव दुष्यन्तेन सह परिणयस्य स्वच्छन्दचेष्टां स्मारं स्मारं तां धिक्कुर्वन् स्पष्टं निषेधति—

**'किम् पुरोभागे। किमिदं स्वातन्त्र्यमवलम्बसे?'** इति[१५]

अथ भर्त्सिता तिरस्कृता च विपदि धैर्यं यदवलम्बते तदेतदुत्तमं शीलमस्या: शकुन्तलाया:।

अत एव शापप्रभावाद् भर्त्रा विप्रकृतापि तस्मिन् दोषं न पश्यति, आत्मन एव पुराकृतं कर्म राज्ञ: सुचरितप्रतिबन्धकं मनुते। तद्यथा—

**'नूनं मे सुचरित-प्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखमासीद्।'** इति[१६]

७. पालिताया: सुताया: पतिगृह-प्रेषणवेलायां गुणान् स्मारं स्मारं तपोधनो महर्षि: स्नेहविकलो मुहुर्ब्रूते—

(क) **वत्से मामेव जडीकरोषि**— इति[१७]

(ख) **अपयास्यति मम शोक: कथन्नु वत्से**— इति[१८]

(ग) **वत्से! किमेवं कातरासि**— इति[१९]

(घ) **स्थिरा भव वत्से!** — इति[२०]

(ङ) **वत्से! एहि परिष्वजस्व मां सखीजनं च**—इति[२१]

(च) **गता वां सहचरी-इति२२ प्रियसख्यौ प्रति कण्वोक्ति:।**

(छ) **तात! शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशाव इति[२३] सख्योरुक्ति:।**

(ज) **वत्से इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति**— इति[२४] व्यवहारमर्मानभिज्ञां प्रति कण्वोक्ति:।

(झ) **पौरव! रक्ष रक्ष विनयम्। कामपीडितापि न खल्वात्मन: प्रभवामि।'** इति[२५] उद्गतकामभूमे: शकुन्तलाया उक्ति:।

८. भारतीयकन्याप्रतिनिधिभूता पादपसेचनव्रतिनी वृक्षसेवां विधायैव जलं पातुमुत्सहते, प्रियमण्डनापि पल्लवं न त्रोटयति अथ लताया आद्ये उद्गमे उत्सवं समायोजयति तदेवं राष्ट्रं पोषयति मोदयति च। तद्यथा —

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**

**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**

**आद्ये वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः**

**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।। इति**[२६]

९. **शीलौदार्यदाक्षिण्यसम्पद्विभूषिता शकुन्तला राष्ट्रकन्या।**

उपर्युक्तगुणगणवैशिष्ट्यमण्डितायाः कन्ययाः नवे तनयाविश्लेषदुःखे गृहिणः स्नेहव्याकुलीभावमापद्यन्ते। यथोक्तम्—

**'यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**

**कण्ठस्तम्भित-वाष्पवृत्ति-कलुषश्चिन्ताजडं दर्शनम्।**

**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**

**पीड्यन्ते गृहिणः कथंनु तनयाविश्लेषदुःखैर्नवैः।।**इति[२७]

१०. जन्मतः गर्भतः सङ्गतश्च वर्णाश्रमधर्मनिष्ठाप्रकर्षः।

शकुन्तलायां स्नेहस्य सौहार्दस्य धैर्यस्य तपसः सहिष्णुतायाः त्यागस्य राष्ट्रियभावनायाश्च परा काष्ठा जागर्ति—येषां सङ्गात्, ते भवन्ति— कण्वः, सख्यौ, गौतमी, शार्ङ्गख-शारद्वतौ, दुष्यन्तः, कश्यपोऽदितिश्च पितरौ, वन्यं वातावरणम्, आश्रमः, वनज्योत्स्ना, पशुपक्षिशावकाः, लतापादपादिः। तत एवासौ कृत्यप्रवणा, श्लाध्ये गृहिणीपदे स्थिता सर्वदमनं भरतं सुतमवाप्य विरहजां शुचं विस्मरन्ती पुत्रपतिराष्ट्राणां यशोवर्धिनी स्तूयमाना विभाति। यथोक्तम्—

**अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनस्**

**त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।**

**सामान्यप्रतिपत्ति-पूर्वकमियं दारेषु दृश्या त्वया**

**भाग्यायत्तमतः परं न खलु तद् वाच्यं वधूबन्धुभिः।।** इति[२८]

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**

**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**

**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**

**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।** इति[२९]

**अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे**

**विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।**

**तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं**

**मम विरहजां न त्वं वत्से शुचं गणयिष्यसि।।** इति[३०]

**भूत्वा चिराय चतुरन्तमहीसपत्नी**

**दौष्यन्तिमप्रतिरथं तनयं निवेश्य।**

**भर्त्रा तदर्पित-कुटुम्बभरेण सार्धं**

**शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्।।** इति च[३१]

११. शान्तिप्रवर्षणे तपोवने गूढतेज:समुद्दीप्ते शकुन्तलाया धर्मभ्राता चक्रवर्तिनमपि शास्तीति प्रभावपूर्णस्वभावा शकुन्तला सर्वासु प्रौढपद्धतिषु नैपुणीं लभमाना स्वं व्यक्तित्वं राष्ट्रं च गौरवान्वितं विधत्ते। यथोक्तम्—

**न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्**

**मृदुनि मृगशरीरे पुष्पराशाविवाग्निः।**

**क्व बत हरिणकानां जीवितं चातिलोलं**

**क्व च निशितनिपाता वज्रसारा:शरास्ते।।**इति[३२]

१२. भीतिभीरुस्वभावापि आश्रमगौरवाद् गुरोर्माहात्म्याच्च वर्णाश्रमधर्मनिष्ठां कौटुम्बिककर्मसु जागृतिं चात्मनि संबिभर्ति-शकुन्तला। गङ्गाप्रवाह इव निर्मल:, हिमालय इव समुज्ज्वल:, रत्नाकर इव गम्भीर: त्रिवेणीवत्तरल: आश्रम: गुरुश्च शकुन्तलां विवेकिनीं राष्ट्रसमुन्नायिकां वर्णाश्रमधर्मरक्षणदीक्षाव्रतधारिणीं विधत्ते। धर्मव्रतिनी दुर्वास:शापादपि अविचलिता शापिनमजानाना शापनिवृत्तिमपि सखीजनसम्प्रार्थनया लब्ध्वा दु:खानि अविगणयन्ती मुन्यन्तरस्याश्रमे वामनावतारजनकस्य कश्यपस्य गुरुमातुश्च आशीराशिं लब्ध्वा राष्ट्रगौरवं सूते सुतं, प्रसूते च भारतस्य बालानां ललनानां कृते महान्तमादर्शम्। तद्यथा—

**'सखि यदि नाम स राजर्षिः प्रत्यभिज्ञानमन्थरो भवेत् तदा अस्येदमात्मनो नामधेयाङ्कितमङ्गुलीयकं दर्शयिष्यसि।'** इति[३३]

**'विचिन्तयन्ती यमनन्यमानसा तपोनिधिं वेत्सि न मामुपस्थितम्।**

**स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव।।** इति[३४]

**सख्यौ — मा भैषीः, स्नेहः पापशङ्की।** इति[३५]

१३. शकुन्तलाया: पति: दुष्यन्त: स्वं हृदयं प्रमाणं विजानाति—[३६]

**'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मन:।**

**सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त:करणप्रवृत्तय:।'** इति

**'कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम्।**

**बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम्।।** इति[३७]

१४. लज्जमाना शकुन्तला पत्या सह कश्यपादित्यो: समक्षं समुपस्थातुं यत् काठिन्यमनुभवति। तत् स्मारयति कुमार्या: पार्वत्या: लज्जाम्। तद्यथा—

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**

**लीलाकमलपत्राणि गणयामास पार्वती।।** इति[३८]

तदेवम् व्यष्टिभेदाद् भिद्यमानानां समेषां मूल्यानां यन्मूलं तन्मानवं मूल्यं कान्तासम्मिततया शाकुन्तलानुशीलिन: साधु चिन्वते।

**राजप्रजासमाजानां मूल्यमन्योन्यभेदवत्।**

**मूलं यत् सर्वमूल्यानां मानवं मूल्यमेव तत्।।**

**तदिदं सकलं मानवं मूल्यं साक्षात् परम्परया वा**

**शाकुन्तलस्य मुख्यं प्रतिपाद्यं विजयते।**

**पादटिप्पणी —**

१.प्रसिद्धा सूक्ति:।

२. उद्धृतं, भूमिका- श्रीकृष्णमणित्रिपाठी-शाकुन्तलम्

३. नाट्यशास्त्रम् १/११६

४. मालविकाग्निमित्रम् प्रथमोऽङ्क:, श्लो०-४

५. उद्धंत भूमिका-पेज० २७ श्रीकृष्णमणित्रिपाठी – शाकु०

६. तदेव- पेज - २८ श्रीकृष्णमणित्रिपाठी – शाकु०

७. तैत्तिरीयोपनिषद् - शिक्षावल्ली-अनुवाक: - ११

८. मनुस्मृति: २/१३३

९. तदेव - २/१४५

१०. अभिज्ञानशाकुन्तलम् - १/२५

११. तदेव  २/१८

१२. तदेव-प्रियंवदोक्ति:—  पेजसं०-१७९

१३. मनुस्मृति: ४/१३८

१४ अभि०, अं०-५, पे०-२६९

१५. तदेव अं०- ५ पे०- २७१

१६. शकुन्तलाशीलप्रकाशकं शाकुन्तलवाक्यम्।

१७. तातकण्वस्योक्ति:

१८. सैवोक्ति:

१९. अभि०शा० अं०-४, पे०- २११

२०. तदेव - अं०-४ पे०-२००

२१. तदेव - अं० - ४, पेज नं० - २०९

२२. तदेव - अं० - ४, पेज नं० - २१६

२३. तदेव - अं० - ४, पेज नं० - २१६

२४. तदेव - अं०- ४, पृ० - २१०

२५. दुष्यन्तं प्रति कन्याया: शकुन्तलाया उक्ति:।

२६. अभिज्ञानशाकुन्तलम् - ४/८

२७. तदेव - ४/५

२८. तदेव - ४/१६

२९. तदेव - ४/१७

३०. तदेव - ४/१८

३१. तदेव - ४/१९

३२. तदेव - १/१०

३३. तदेव - अं० ४, पेज. २१२

३४. तदेव - ४/१

३५. तदेव अं० - ४, पेज० २१३

३६. तदेव अं०- १/२२

३७. तदेव अं० - ५/३१

३८. कुमारसम्भवम् - ६/८४

**सन्दर्भ-ग्रंथ-सूची**


कालिदासः — अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृतसीरीज़ऑफिस, वाराणसी, 1960 .

कालिदासः— अभिज्ञानशाकुन्तलम्, पं० रामनारायणशुक्लः, चौखम्बा विद्याभवन, 1957.

कालिदासः— अभिज्ञानशाकुन्तलम्, गीताप्रेसः, गौरक्षपुरम् 1947.

Kālidāsa — Abhijñānaśākuntalam, Translated by Arthur W. Ryder, Harvard University Press, 1912.

Kālidāsa — Abhijñānaśākuntalam, Translated by Monier Monier-Williams, Oxford University Press, 1853.

Keith, A. B. — The Sanskrit Drama, Oxford University Press,1924.

दासगुप्त, सुरेन्द्रनाथ — संस्कृत साहित्य का इतिहास,मोतीलाल बनारसीदास, 1946.

उपाध्याय, बलदेव — संस्कृत नाटक का विकास, चौखम्बा विद्याभवन, 1968.

अप्टे, वामन शिवराम — संस्कृत–हिंदी शब्दकोश, मोतीलाल बनारसीदा, 1957.